श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये चतुष्षष्टितमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये चतुष्षष्टितमं दशकम् ॥

## गोविन्दाभिषेकवर्णनं नन्दानयनवर्णनं च

आलोक्य शैलोद्धरणादिरूपं
    प्रभावमुच्चैस्तव गोपलोकाः।
विश्वेश्वरं त्वामभिमत्य विश्वे
    नन्दं भवज्जातकमन्वपृच्छन् ॥ 64.1 ॥

गर्गोदितो निर्गदितो निजाय
    वर्गाय तातेन तव प्रभावः।
पूर्वाधिकस्त्वय्यनुराग एषा -
    मैधिष्ट तावत् बहुमानभारः ॥ 64.2 ॥

ततोऽवमानोदिततत्त्वबोधः
    सुराधिराजः सह दिव्यगव्या।
उपेत्य तुष्टाव स नष्टगर्वः
    स्पृष्ट्वा पदाब्जं मणिमौलिना ते ॥ 64.3 ॥

स्नेहस्नुतैस्त्वां सुरभिः पयोभि -
    र्गोविन्दनामाङ्कितमभ्यषिञ्चत्।
ऐरावतोपाहृतदिव्यगङ्गा -
    पाथोभिरिन्द्रोऽपि च जातहर्षः ॥ 64.4 ॥

जगत्त्रयेशे त्वयि गोकुलेशे
    तथाऽभिषिक्ते सति गोपवाटः।

नाकेऽपि वैकुण्ठपदेऽप्यलभ्यां
    श्रियं प्रपेदे भवतः प्रभावात्॥ **64.5**॥

कदाचिदन्तर्यमुनं प्रभाते
    स्नायन् पिता वारुणपूरुषेण।
नीतस्तमानेतुमगाः पुरीं त्वं
    तां वारुणीं कारणमर्त्यरूपः॥ **64.6**॥

ससम्भ्रमं तेन जलाधिपेन
    प्रपूजितस्त्वं प्रतिगृह्य तातम्।
उपागतस्तत्क्षणमात्मगेहं
    पिताऽवदत्तच्चरितं निजेभ्यः॥ **64.7**॥

हरिं विनिश्चित्य भवन्तमेतान्
    भवत्पदालोकनबद्धतृष्णान्।
निरीक्ष्य विष्णो परमं पदं तद् -
    दुरापमन्यैस्त्वमदीदृशस्तान्॥ **64.8**॥

स्फुरत्परानन्दरसप्रवाह -
    प्रपूर्णकैवल्यमहापयोधौ।
चिरं निमग्नाः खलु गोपसङ्घा -
    स्त्वयैव भूमन् पुनरुद्धृतास्ते॥ **64.9**॥

करबदरवदेवं देव कुत्रावतारे
    निजपदमनवाप्यं दर्शितं भक्तिभाजाम्।
तदिह पशुपरूपी त्वं हि साक्षात् परात्मा
    पवनपुरनिवासिन् पाहि मामामयेभ्यः॥ **64.10**॥

॥ इति श्रीमन्नारायणीये चतुष्षष्टितमं दशकं समाप्तम्॥